# shrIsudarshanastotram

# શ્રીસુદર્શનસ્તોત્રમ્

## Document Information

Text title : sudarshanastotram 1

File name : sudarshanastotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Transliterated by : Musiri Janakiraman mnjraman at hotmail.com

Proofread by : Musiri Janakiraman mnjraman at hotmail.com

Description/comments : kumbhakoNamAhAtmya

Source : page 924, Part II of Sri Jayamangala Stotram

Acknowledge-Permission: Sri Anantarama Dikshithar Athishtanam Trust

Latest update : April 15, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીસુદર્શનસ્તોત્રમ્

સુદર્શન મહાજ્વાલ પ્રસીદ જગદઃ પતે ।
તેજોરાશે પ્રસીદ ત્વં કોટિસૂર્યમિતપ્રભ ॥ ૧॥

અજ્ઞાનતિમિરધ્વંસિન્ પ્રસીદ પરમાદ્ભુત ।
સુદર્શન નમસ્તેઽસ્તુ દેવાનાં ત્વં સુદર્શન ॥ ૨॥

અસુરાણાં સુદુર્દર્શ પિશાચાનાં ભયઙ્કર ।
ભઞ્જકાય નમસ્તેઽસ્તુ સર્વેષામપિ તેજસામ્ ॥ ૩॥

શાન્તાનામપિ શાન્તાય ઘોરાય ચ દુરાત્મનામ્ ।
ચક્રાય ચક્રરૂપાય પરચક્રાય માયિને ॥ ૪॥

હતયે હેતિરૂપાય હેતીનાં પતયે નમઃ ।
કાલાય કાલરૂપાય કાલચક્રાય તે નમઃ ॥ ૫॥

ઉગ્રાય ચોગ્રરૂપાય ક્રુદ્ધોલ્કાય નમો નમઃ ।
સહસ્રારાય શૂરાય સહસ્રાક્ષાય તે નમઃ ॥ ૬॥

સહસ્રાક્ષાદિ પૂજ્યાય સહસ્રારશિરસે નમઃ ।
જ્યોતિર્મણ્ડલરૂપાય જગત્રિતય ધારિણે ॥ ૭॥

ત્રિનેત્રાય ત્રયી ધામ્ને નમસ્તેઽસ્તુ ત્રિરૂપિણે ।
ત્વં યજ્ઞસ્ત્વં વષટ્કારઃ ત્વં બ્રહ્મા ત્વં પ્રજાપતિઃ ॥ ૮॥

ત્વમેવ વહ્નિસ્તવં સૂર્યઃ ત્વં વાયુસ્ત્વં વિશામ્પતિઃ ।
આદિમધ્યાન્ત શૂન્યાય નાભિચક્રાય તે નમઃ ॥ ૯॥

જ્ઞાનવિજ્ઞાનરૂપાય ધ્યાન ધ્યેયસ્વરૂપિણે ।
ચિદાનન્દસ્વરૂપાય પ્રકૃતેઃ પૃથગાત્મને ॥ ૧૦॥

ચરાચરાણાં ભૂતાનાં સૃષ્ટિસ્થિત્યન્તકારિણે ।
સર્વેષામપિ ભૂતાનાં ત્વમેવ પરમાગતિઃ ॥ ૧૧॥

ત્વયૈવ સર્વં સર્વેશ ભાસતે સકલં જગત્ ।
ત્વદીયેન પ્રસાદેન ભાસ્કરોઽસ્મિ સુદર્શન ॥ ૧૨॥

ત્વત્તેજસાં પ્રભાવેન મમતેજો હતં પ્રભો ।
ભૂયસ્સંહર તેજસ્ત્વં અવિષહ્યં સુરાસુરૈઃ ॥ ૧૩॥

ત્વત્પ્રસાદાદહં ભૂયઃ ભવિષ્યામિ પ્રભાન્વિતઃ ।
ક્ષમસ્વ તે નમસ્તેઽસ્તુ અપરાધં કૃતં મયા ।
ભક્તવત્સલ સર્વેશ પ્રણમામિ પુનઃ પુનઃ ॥ ૧૪॥

ઇતિ સ્તુતો ભાનુમતા સુદર્શનઃ હતપ્રભેણાદ્ભુત ધામ વૈભવઃ ।
શશામ ધામ્નાતિશયેન ધામ્નાં સહસ્રભાનૌ કૃપયા પ્રસન્નઃ ॥ ૧૫॥

॥ ઇતિ શ્રીકુમ્ભકોણમાહાત્મ્યે શ્રીસૂર્યકૃત શ્રીસુદર્શનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Musiri Janakiraman mnjraman at hotmail.com

From page 924, Part II of Sri Jayamangala Stotram, 2nd Edition 2004
[Publishers Ms. N. Subhadra and Co., 1 Second Cross, Maravaneri,
Salem 636 007 (Ph: 0427-2415873); Sri Anantarama Dikshithar Athishtanam Trust

*shrIsudarshanastotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*